# ৫. শিক্ষা

শিক্ষা জাতেরুন্নতের্মূলম্। শিক্ষামন্তরা কোঽপি দেশঃ কস্মিন্নপি ক্ষেত্রে সমুন্নতো ভবিতুং ন শক্নোতি। যে দেশা অদ্য সমুন্নতাঃ সন্তি, তেষাং জনতা, প্রায়ঃ শিক্ষিতা। যদা অস্মাকং দেশে প্রায়ঃ সমস্ত জনতা শিক্ষিতা আসীৎ, তদা অয়ং দেশোঽন্যেষাং দেশানাং কৃতে অনুকরণীয়োঽভবৎ। শিক্ষায়াঃ প্রভাবেনৈব ভারতস্য বিষয়ে 'এতদ্দেশ প্রসূতস্য সকাশাদগ্রজন্মনঃ। স্বং স্বং চরিত্রং শিক্ষেরন্ পৃথিব্যাং সর্বমানবাঃ' ইতি কথনং সঙ্গতমভবৎ।

মানবজীবনে শিক্ষায়া অপূর্বং মহত্ত্বং বর্ততে। শিক্ষয়ৈব মানবো মানবতাং

Scanned by CamScanner

লভতে। মনুষ্যস্যান্তর্হিতা গুণাঃ শিক্ষয়ৈব প্রকাশ্যন্তে। শিক্ষাং বিনা পশুমনুষ্যয়োঃ কিমপ্যন্তরং নাস্তি। শিক্ষয়া মনুষ্যঃ সমাজে সমাদৃতো ভবতি সমাজস্য কল্যাণঞ্চাপি কর্তুং শক্নোতি। সর্বেষাং দেশানাং শাসনসূত্রং প্রায়ঃ শিক্ষিতানামেব হস্তেষু বর্ততে।

বস্তুতো যৈঃ সাধনৈর্মনুষ্যস্য মস্তিক-হৃদয়-শরীরাণি সমানরূপেণ সম্যক্ সংস্কৃতানি বিকশিতানি চ জায়ন্তে, তানি সর্বাণি সাধনানি শিক্ষান্তর্ভূতানি ভবন্তি। যদ্যপি সর্বেঽপি শিক্ষিতাঃ প্রায়ঃ সাক্ষরা এব ভবন্তি, তথাপীতিহাসে অনেকান্যুদাহরণানীদৃশানি সন্তি — অনেকে নিরক্ষরা অপি শিক্ষিতেষু গণ্যন্তে। মহাত্মা কবীরঃ, ছত্রপতিঃ শিবাজী, মহামতিরাকবরশ্চ সাক্ষরা নাসন্, পরন্তু তে পূর্ণতয়া শিক্ষিতা ইতি সর্বৈরেব স্বীক্রিয়ন্তে।

মহান্ খেদো ভবতি, যদা বয়ং পশ্যামঃ, প্রায়ঃ বহবঃ শিক্ষিতা জনাঃ শিক্ষায়া বাস্তবিকমুদ্দেশ্যং পরিহায় স্বার্থসিদ্ধ্যর্থমিতস্ততঃ প্রধাবন্তি। এবমধোগতেঃ কারণং বর্তমানয়া শিক্ষয়া মনুষ্যাণাং নৈতিকস্তরস্যোত্থানং ন ভবতি, তেষাং মস্তিষ্ক-হৃদয়য়োঃ সংস্কারোঽপি ন জায়তে। প্রাচীনা মহান্তঃ আদর্শা অদ্যতনশিক্ষায়াং নৈব সন্তি। পরীক্ষোত্তরণমেবাধুনিক শিক্ষায়াঃ লক্ষ্যমস্তি। যেন জীবনস্যাধি-ভৌতিক্য আবশ্যকতাঃ কথঞ্চিৎ পূর্ণা ভবেয়ুঃ, তদেবাধুনিকেষু বিদ্যালয়েষু মহাবিদ্যালয়েষু বিশ্ববিদ্যালয়েষু চ শিক্ষ্যতে।

যদ্যপ্যশিক্ষায়া রূপমতিবিকৃতমস্তি, তথাপ্যস্মাভিস্তথা প্রযতিতব্যং যথাঽস্যা বাস্তবিকমুদ্দেশ্যং জনতা জানীয়াৎ। আধুনিকশিক্ষা প্রণাল্যাং প্রাচীনা ভারতীয়া আদর্শাঃ সমাবেষ্টব্যাঃ যেন ছাত্রাণাং চরিত্রনির্মাণং স্যাৎ নৈতিকস্তরস্যোত্থানং চ ভবেৎ তথাচ তে শিক্ষয়া ভবেয়ুঃ সুনাগরিকাঃ।

অতঃ আশাস্যতে যদ্ ভারতীয় শিক্ষাবিভাগোঽচিরাৎ বর্তমানশিক্ষা-প্রণাল্যামাবশ্যকং সুধারং করিষ্যতীতি।

## ৬. সংহতিঃ কার্যসাধিকা ৭. একতা এব বলম্

কর্মময়মিদং জগৎ। অত্র কর্মকুর্বন্নেব মনুষ্যো জীবিতুং শক্নোতি। উপনিষদীয়া শিক্ষা — 'কুর্বন্নেব হি কর্মাণি জিজীবিষেচ্ছতং সমাঃ'। অতঃ কর্ম পরিত্যজ্য কোঽপি সংসারে স্থাতুং ন শক্নোতি। কর্ম তু সুকরং দুষ্করম্ উভয়বিধং ভবতি। যৎ কর্ম সুকরম্ এক এব জনঃ কর্তুং সমর্থো ভবেৎ। কিন্তু দুষ্করং কর্ম বলবান্ অপি অন্যেষাং সহায়ং বিনা কর্তুং ন শক্নোতি। প্রত্যুত পক্ষে যৎ কর্ম একেন দুঃসাধ্যং তত্তু যদি বহূনাং সংহতি র্ভবেৎ তর্হি লীলয়ৈব সম্পন্নং ভবেৎ। কা কথা বলবতাং মেলনেন। বহুভিঃ দুর্বলৈরপি মহত্তমং দুষ্করমপি কর্ম সুকরমিব

Scanned by CamScanner

অনায়াসেন সম্পাদ্যতে। তৃণম্ এতাদৃশী কোমলং যৎ কশ্চিৎ বালকোঽপি ছেত্তুং শক্নোতি, গুণত্বমাপন্নৈস্তৃণৈস্তু মত্তহস্তিনোঽপি বধ্যন্তে। কশ্চিদ্ জলবিন্দুরনায়াসেন সূর্যকিরণৈঃ বায়ুনা বা শুষ্যতে। ধারাসম্পাতস্তু ধরাং প্লাবয়তি।

সংহত্যা জায়তে একতা। একতা এব জগতি শ্রেষ্ঠং বলম্। ইহ জগতি ভিন্নরুচয়ো মানবাঃ সন্তি। সর্বে এব যদি স্ব স্বরুচ্যনুসারিণীং ক্রিয়াং কর্তুমিচ্ছন্তি তর্হি প্রায়শো বিফলতাং যান্তি। যদি রুচের্ভিন্নত্বং বিহায় 'সংহতিঃকার্যসাধিকা' ইতি মন্ত্রং জপন্তঃ একমতয়ো ভূত্বা জনাঃ যস্মিন্ কস্মিন্নপি কর্মণি প্রবৃত্তাঃ ভবন্তি তর্হি নূনমেব সর্বত্র তৎ তৎ কর্ম সফলং ভবেৎ। সংহতিরেকতা বা কার্যসিদ্ধের্নিদানমিতি বিদ্বাংসঃ আমনন্তি। বস্তুজগতি অপি সংহতেঃ সাফল্যং দরীদৃশ্যতে। যথা ক্ষুদ্রাণাং জলবিন্দূনাং সংহতিঃ মহোদধিং সৃজতি। বালুকণানাং সমবায়েন দুস্তরা মরুভূমির্জায়তে। অধুনাতনকালে বৈজ্ঞানিকমুখ্যাঃ সমবায়শক্ত্যা দুরারোহ্যং পর্বতশিখরম্ অধিরোহন্তি ভূলোকাৎ লোকান্তরগমনায়াপি চেষ্টন্তে।

একতাং বিহায় কদাপি অভ্যুদয়ঃ সফলতাপি নায়াতঃ। যদি কস্মিংশ্চিৎ পরিবারে সর্বে পরিজনাঃ পরস্পরং ভিন্নমনাঃ তর্হি বিবদমানস্য তস্য পরিবারস্য অচিরেণ অবনতি র্ভবেৎ। তথা জাতীয়স্বার্থে ব্যক্তিস্বার্থং ত্যক্ত্বা ব্যক্তীনাং যদা ঐকমত্যং ন জায়তে, সর্বে ন সংহতা ভবেয়ুস্তদা জাতেরগ্রগতি র্ব্যাহতা ভবেৎ অবনতিরাশু ভবতি। সংহতেঃ মহত্ত্বং সুপ্রাচীনকালাদেব প্রতিষ্ঠিতম্। ঋক্মন্ত্রেঽপি অস্যৈব নির্দেশঃ —

'সঙ্গচ্ছধ্বং সংবদধ্বং সংবো মনাংসি জানতাম্'

## ৮. ছাত্রজীবনম্ ৯. ছাত্রাণামধ্যয়নং তপঃ ১০. ছাত্রজীবনে কর্তব্যম্

মানবানাং জীবনং মুখ্যতঃ বাল্যং কৈশোরং যৌবনং বার্ধক্যঞ্চেতি চতুর্ধা বিভক্তম্। তেষু বিভাগেষু বাল্যকৈশোরাভ্যাং সহ যৌবনস্য প্রথমার্ধং মিলিত্বা ছাত্রজীবনং গঠিতম। ছাত্রজীবনং মধুরতমম্ আনন্দপ্রাচুর্যাৎ। ছাত্রজীবনমপি কর্তব্যাকীর্ণং তথাপি তত্র অনাবিলমানন্দং বিদ্যতে, তেন হৃদি নিরবচ্ছিন্না প্রশান্তিঃ বিরাজতে।

'যো হি গুরোর্দোষং সম্যক্ আবৃণোতি স এব ছাত্রঃ'

ছাত্রজীবনং যদ্যপি আনন্দময়ং জীবনং তথাপি কর্তব্যময়মপি। মনুষ্যাণাং

Scanned by CamScanner

জীবনদশায়াঃ ভিত্তিভূমিরিব ছাত্রদশা। অস্মিন্নেব কালে বিদ্যাভ্যাসঃ সর্বতো ভাবেন কর্তব্যঃ। যতঃ সাধু কথ্যতে 'ছাত্রাণামধ্যয়নং তপঃ'। ছাত্রজীবনে অধ্যয়নং বিনা মনসি অন্যা কাপি চিন্তা স্থানং ন লভতে। ভারতসংস্কৃতৌ স্থিতানাং চতুর্ণামাশ্রমানাং ব্রহ্মচর্যাশ্রমঃ ছাত্রজীবনকালঃ। তেন কিন্তু সুখসম্ভোগস্য অবসরো নাস্তি। নীতিশাস্ত্রে উক্তম্, 'সুখার্থী চেৎ ত্যজেদ্বিদ্যাং বিদ্যার্থী চেৎ সুখং ত্যজেৎ'। যতঃ ছাত্রজীবনে সর্বে সময়নিষ্ঠাঃ নিয়মনিষ্ঠাঃ কর্তব্যনিষ্ঠাশ্চ ভবিতুমর্হন্তি। ছাত্রাঃ যদ্যপি পরস্পরং মিত্রত্বমাপন্নাঃ হাস্যকলরবেন সময়ং যাপয়ন্তি, তথাপি এতন্ন সর্বদৈব কর্তব্যং, যে ছাত্রাঃ বিদ্যার্জনং ন কৃত্বা কেবলং সুখভোগেন আলস্যেন চ বৃথা কালং নয়ন্তি তে ভাবিজীবনে মহৎ দুঃখমেব প্রাপ্নুবন্তি।

ছাত্রজীবনে অধ্যয়নেন সহ নিয়মশৃঙ্খলা যত্নেন পালনীয়া। যথাকালং বিদ্যামন্দিরগমনং তত্র অধ্যাপকেভ্যঃ শিক্ষাগ্রহণং, শরীরচর্চা, সচ্চিন্তনম্, সদ্গ্রন্থপঠনং, সৎসঙ্গকরণম্ ইত্যাদিকং ছাত্রজীবনে মনুষ্যাণামবশ্যং কর্তব্যম্। কর্মজীবনং সুদৃঢ়ং কর্তুং ছাত্রজীবনে নিয়মিতং দৈহিকব্যায়ামেন যথা শরীরং দৃঢ়ং শক্তিমচ্চ তথৈব মনোঽপি যৌগিকব্যায়ামেন দৃঢ়ং স্থিরঞ্চ কর্তুম্ মানুষাঃ যত্নবন্তো ভবেয়ুঃ। সুস্থদেহমনোনির্মাণস্য প্রকৃষ্টোঽয়ং সময়ঃ। পুনরপি ছাত্রজীবনে এব সর্বে শ্রদ্ধাবন্তো ভবেয়ুঃ। অস্মিন্ সময়ে যে তাবৎ শ্রদ্ধাবন্তঃ বিনয়িনঃ সন্তঃ জ্ঞানলাভায় চেষ্টন্তে তে এব আগামিনি দিবসে মনুষ্যসমাজে কীর্তিং সুখঞ্চ লপ্স্যন্তে।

## ১১. পরিবেশদূষণম্ তৎ প্রতীকারশ্চ

বয়ং জানীমঃ, পরিমণ্ডলান্তর্গতং স্থানং খলু পরিবেশঃ। অস্মাকং বাসস্থানস্য চতুস্পার্শ্বস্থং জলং ভূমিঃ বায়ুঃ পরিজনঃ প্রতিবেশী ইত্যাদিকমবলম্ব্য পরিবেশঃ গঠিতঃ। সুস্থজীবন-নির্বাহার্থং পরিবেশস্য শুদ্ধতা অবশ্যস্বীকার্য্যা।

পুরা ভারতভূমিঃ তপোভূমিরাসীৎ। তদা বৃক্ষলতাদিনা প্রাকৃতিক বিভবেন ভারতভূমেঃ পরিবেশঃ স্নিগ্ধশীতলঃ পবিত্রশ্চ আসীৎ। ভারতবাসীনাং জীবনচর্যা তেন স্বাভাবিকী অনুকূলা চ আসীৎ। ন কেবলং ভারতবর্ষং পুরা সমগ্রাধরণী প্রকৃত্যা সংরক্ষিতা আসীৎ।

[শব্দদূষণম্] অধুনা বিজ্ঞানস্য উন্নতিতয়া তেন সহ অস্মাকম্ অজ্ঞতয়া বৃক্ষাদীনি প্রাকৃতিকবস্তূনি প্রতি অনাদরবশাৎ ক্রমেণ পরিবেশেন দুষিতেন ভূয়তে। তেন সর্বে বৈজ্ঞানিকাঃ জনান্ প্রতি সাবধান বাণীম্ ঘোষয়ন্তি, পরিবেশো বিশুদ্ধো রক্ষিতব্যঃ সর্বৈরিতি। ছায়াতরুঃ, বিশুদ্ধোবায়ুঃ নির্মলং জলং দূষণমুক্তঃ

Scanned by CamScanner

পরিবেশঃ। এতানি অন্তরেণ জীবানাং জীবনযাপনং অভিশাপবহনতুল্যম্। কিন্তু অধুনা ভোগবাদস্য প্রাবল্যাৎ শান্তিনীড়ানি তপোবনানি সমুচ্ছিদ্য প্রতিষ্ঠিতানি যন্ত্রাগারাণি। অতঃ বিশুদ্ধ পরিবেশস্য আদ্যঙ্গং বৃক্ষঃ নিশ্চিহ্নো জাতঃ। অপি চ তেষাং চক্রাণাং নির্ঘোষৈঃ শব্দদূষণং জায়তে তথা দূষিতা জাতা সামগানমুখরিতা স্বর্গোপমা ভারতভূমিঃ।

পুরা অগ্নেঃ সীমিতো ব্যবহার আসীৎ শুদ্ধপরিবেশসহায়কঃ। অধুনা যন্ত্রাগারে যানবাহনে ইত্যাদৌ অগ্নির্যথেচ্ছং প্রজ্বলিতঃ সন্ অক্সিজেন নিধনেন বায়ুঃ দূষিতো ভবতি, তেন সহ নগরনির্মাণলালসয়া অরণ্যনিধনেন জনা আত্মনিধনমাহ্বয়তি। যতস্তরবঃ যথা অক্সিজেন পরিশোধকা স্তথা কার্বনডাই অক্সাইড নাশকাঃ। অপি চ বায়ৌ সীসাপারদসালফারডাইঅক্সাইড মনোক্সাইড ইত্যাদীনি রাসায়নিক দ্রব্যাণি মিশ্রিতানি। এবম্ নানা প্রকারেণ বায়ু দূষণং ভবতি। তস্মাৎ পরিবেশদূষণমপি ভবন্তি।

[বায়ুদূষণম্] দ্বিতীয়প্রকারং পরিবেশদূষণং মৃত্তিকাদূষণম্। বনবিভাগেন অধুনা প্রায়শঃ বৃক্ষরোপণায় উৎসাহোদীয়তে। যতঃ বৃক্ষেণ যথা বায়ুঃ শোধিতঃ স্যাৎতথৈব ভূমিরপি সংরক্ষিতা স্যাৎ। বৃক্ষচ্ছেদনেন পশুচারণেন ঝঞ্ঝাদি দুর্যোগেন চ ভূমিঃক্ষয়ং প্রাপ্নোতি। অতঃ বৃক্ষরোপণেন তথা বনসংরক্ষণেন ভূমিক্ষয়ো নিবারণীয়ঃ। এতৎকর্ম বিশুদ্ধপরিবেশসহায়কম্।

তৃতীয়ং **জলদূষণম্**। জলদূষণং হি মানবসভ্যতায়া অভিশাপস্বরূপম্। বিবিধকারণেন সমুদ্রনদ্যাদীনাং জলং দূষিতং ভবেৎ। যথা নগরাণাং খাতবাহিতং দূষিতং তরলদ্রব্যং রাসায়নিক বর্জ্যদ্রব্যং চ জলে মিশ্রিতে ভবতঃ। বিশেষেণ গ্রামেষু যথোচিতং মলমূত্রত্যাগব্যবস্থাদিকং নাস্তি। এতেন যত্র তত্র পুষ্করিণ্যা মলিনং জলং রোগান্ বিস্তারয়তি। জলং হি জীবানাং জীবনম্। তস্য দূষণেন পরিবেশো দূষিতো ভবতি — অত্র কাপি সন্দেহো নাস্তি। এতস্য প্রতীকারার্থমাদৌ উন্মুক্তশৌচালয়-নির্মাণঃ কর্তব্যঃ। তেন সহ পানীয়জল-সুরক্ষার্থং ব্যবস্থা অবলম্বনীয়া।

যৎ চতুর্বিধং **পরিবেশদূষণং** প্রখ্যাতং, বায়ুদূষণং, মৃত্তিকাদূষণং, জলদূষণং **শব্দদূষণঞ্চ**, তেষু **শব্দদূষণম্** দুর্বিষহং দূষণম্। যানানাং যন্ত্রাণাঞ্চ ঘর্ঘররবঃ সততং জনানাং হৃদয়ং বিদারয়তি, বিশেষতঃ রোগিণাং বৃদ্ধানাং শিশূনাঞ্চ। উৎসবদিবসেষু শব্দবর্ধকানি যন্ত্রাণি অধুনা নিয়ন্ত্রিতানি দূষণপর্ষদা ইতি আশীর্বাদ এব।

অস্তি অপরমপি দূষণং ভয়াবহং পরিমাণুবিস্ফোরণজনিতম্। ১৯৯৮ খ্রীষ্টাব্দে রাজস্থান প্রদেশস্য পোখর নাম্নি স্থানে ভারতসর্বকারেণ পরমাণুবিস্ফোরণং কৃতম্। এতেন জলে, স্থলে, নভসি তেজস্ক্রিয়জাতং দূষণং বিস্তীর্ণং জাতম্।

Scanned by CamScanner

১৯৭২ খ্রীষ্টাব্দে পৃথিব্যাঃ বহুপ্রদেশা রাষ্ট্রসংঘস্য উদ্যোগেন পরিবেশদূষণরোধায় মিলিতা বভূবুঃ। অস্মিন্ সম্মেলনে এব আন্তর্জাতিক পরিবেশ সংস্থা নির্মিতা। সা সংস্থা বিশ্বস্য পরিবেশরক্ষণার্থং যততেঽধুনা। ভারতবর্ষেঽপি ১৯৮১ খ্রীষ্টাব্দে পরিবেশ বিভাগঃ স্থাপিতঃ। তথাপি স্মরণীয়ং যৎ, নৈতিমূল্যবর্ধনম্ উতবা শুভবুদ্ধিজাগরণং বিনা বিধিবচনেন পরিবেশরক্ষণং ন সম্ভবতি। পরিবেশদূষণ বিষয়ে বিস্তৃতঃ শিক্ষাপ্রসারঃ কর্তব্যঃ।

পরিবেশদূষণং পৃথিব্যা সর্বেষাং দেশানাং সমস্যা অস্যাঃ সমাধানায় সবিশেষং গুরুত্বং প্রদেয়মিতি অন্যথা একদা মানবসভ্যতা পৃথিবীতঃ উচ্ছিন্না ভবেদিতি।

## ১২. বর্ষা

সৌভাগ্যমেতদস্মাকং দেশে ষড়্ ঋতবঃ স্বসময়ানুসারং সমায়ান্তি গচ্ছন্তি চ। প্রত্যেকর্তুর্মাসদ্বয়ং তিষ্ঠতি। যথা যদা গ্রীষ্মাতপেন সর্বে প্রাণিনো বৃক্ষাদয়শ্চ ব্যাকুলতামায়ান্তি তদা বর্ষাঃ আগচ্ছন্তি। বর্ষাসু গগনে শ্যামমেঘানামিতস্ততঃ প্রধাবতাং মহানির্ঘোষঃ শ্রূয়তে। বায়ুঃ কদাচিন্মন্দগত্যা কদাচিচ্চ তীব্রগত্যা প্রচলতি। সর্বেঽপি পশুপক্ষ্যাদয়ো জীবাঃ প্রফুল্লাঃ জাতাঃ। ময়ূরা উন্মদাঃ সন্তঃ ইতস্ততো নৃত্যন্তি। ধরণী হরিদ্বর্ণা সতী শোভতে। তদৈব যথার্থং ধরণী সুজলা সুফলা শস্যশ্যামলা ইব দৃশ্যতে।

অস্মিন্ ঋতৌ প্রকৃতিরীদৃশী শোভামাধত্তে যৎ কালিদাসাদয়ঃ সর্বেঽপি মহান্তঃ কবয়ঃ সৌন্দর্যেন সমাকৃষ্টাঃ সন্তি। সর্বেঽপি মহাকবয়ঃ স্বকাব্যেষু বর্ষাণাং বিস্তৃতং সুরম্যং বর্ণনং কৃতবন্তঃ। সর্বেঽপি স্ত্রীপুরুষা বর্ষাসু যৌবনোন্মাদং লভন্তে। বর্ষাসু নদ্যঃ তড়াগাঃ পল্ললানি চ জলপূর্ণানি জায়ন্তে। কর্ষকাঃ স্বক্ষেত্রে কার্যানি কুর্বন্তঃ আনন্দপূর্ণা ভবন্তি। মহাকবি বাল্মীকিঃ রামায়ণে বর্ষাসু জীববৈচিত্র্যং কথয়ামাস —

‘বহন্তি বর্ষন্তি নদন্তি ভান্তি ধ্যায়ন্তি নৃত্যন্তি সমাশ্বসন্তি।
নদ্যো ঘনা মত্তগজা বনান্তাঃ প্রিয়বিহীনাঃ শিখিনঃ প্লবঙ্গাঃ॥

কিঞ্চ বর্ষাসু অনেক স্থানেষু প্লাবনং জায়তে তেন তত্র পৃথিবী জলময়ী ইব প্রতীয়তে। যদ্যপি মাহাত্ম্যগুণেন বর্ষাঃ ঋতুসম্রাজ্ঞী ইত্যাখ্যা লভতে, তথাপি অস্মিন্ ঋতৌ হানিরেব জায়তে। বহুষু স্থানেষু নদ্যঃ সমীপস্থান্ গ্রামান্ প্লাবয়ন্তি, যেনানেকা জনাঃ পশবশ্চ ম্রিয়ন্তে, ধনধান্যহানিরপি চ মহতী জায়তে। বহুবর্ষণেন বহুষু স্থানেষু শস্যহানিঃ গৃহহানিঃ জীবনহানিরপি ভবন্তি। যাতায়াতমনেকেষু স্থানেষু অতিকঠিনং জায়তে তেনৈব কবিনা কথ্যতে ‘স্থিতা হি যাত্রা বসুধাধিপানাম্’।

Scanned by CamScanner

যদ্যপি বর্ষাসু হানয়ঃ সন্তি তথাপি কৃষিপ্রধানে অস্মাকং দেশে অস্য ঋতোরপূর্বং মাহাত্ম্যং বর্ত্ততে। অস্মাকং দেশে বর্ষাঃ প্রাণসদৃশাঃ। বর্ষামবলম্ব্য কৃষিবলং প্রাচুর্যং লভতে। তেনৈব দেশঃ সমৃদ্ধো ভবতি। অনাবৃষ্টিরেব দুর্ভিক্ষস্য মূলম্। বর্ষাঃ বিনা দুর্ভিক্ষং জায়তে দুর্মরণং সংঘটতে। পুনরপি বর্ষাঋতুর্মিলন-ঋতুঃ। বর্ষাকালীন মেঘং সংলক্ষ্য যথা বিরহী যক্ষঃ প্রিয়াসন্দর্শনার্থং ব্যাকুলো বভূব তথৈব অদ্যাপি বর্ষাগমনেন সমং সর্বে জন্তবঃ পরস্পরং মিলিতুং যততে। তেন তদা কোঽপি প্রবাসে স্থাতুং নেচ্ছতি। কবিরাহ — প্রবাসিনো যান্তি নরাঃ স্বদেশান্।

অতঃ বয়ং সর্বদা সর্বথা বর্ষাঋতুং স্বাগতং নিবেদয়ামঃ।

## ১৩. শরৎকালঃ

বঙ্গেষু গ্রীষ্মবর্ষাদিক্রমেণ ষট্ঋতবঃ সন্তি। এতে সর্বে ঋতবঃ পর্যায়ক্রমেণ আয়ান্তি গচ্ছন্তি চ। ঋতুচক্রস্য পর্যায়ক্রমাৎ শরৎকালো বর্ষাকালমনু প্রাদুর্ভবতি। শরদি অপূর্বা কাপি শ্রীমণ্ডিতা প্রকৃতির্ভবতি। বাল্মীকি রাহ —

সম্প্রত্যনেকাশ্রয়চিত্রশোভা লক্ষ্মীঃ শরৎকালগুণোপপন্না।
সূর্যাগ্রহস্তপ্রতিবোধিতেষু পদ্মাকরেষ্বভ্যধিকং বিভাতি॥

বর্ষাঃ অপগতা ইতি সূচয়ন্ আদিকবিরাহ —

লোকং সুবৃষ্ট্যা পরিতোষয়িত্বা নদীস্তটকানি চ পূরয়িত্বা।
নিষ্পন্ন শস্যাং বসুধাঞ্চ কৃত্বা ত্যক্তানভস্তোয়ধরাঃ প্রনষ্টাঃ॥

শরদি নদীতড়াগাদীনাং জলং নির্মলং ভবতি। আকাশে ক্বচিৎ শুভ্রাণি মেঘখণ্ডানি দৃশ্যন্তে ক্ষণাৎ বিলীয়ন্তে চ। মার্গাশ্চ কর্দমহীনা ভবন্তি, সরোবরেষু কুমুদানি কমলানি চ বিকশন্তি। হংসা সানন্দং বিচরন্তি।

আদিকবিনা বর্ণ্যতে —

জলং প্রসন্নং কুসুমপ্রহাসং ক্রৌঞ্চস্বনং শালিবনং বিপক্বম্।
মৃদুশ্চবায়ুর্বিমলশ্চ চন্দ্রঃ শংসন্তি বর্ষব্যপনীত কালম্॥

শরদি কুসুমসমৃদ্ধিরপি দর্শনীয়া। তদা শেফালী কাশহাসৈঃ হসতীব প্রকৃতিঃ। দশ দিশঃ প্রসন্নাঃ জায়ন্তে। অস্মিন্ কালে রবিকরো ন প্রখরঃ শশিকরশ্চ প্রীতিকরঃ। শারদপূর্ণিমায়াং চন্দ্রমসঃ রমণীয়া শোভা কস্য মনো ন হরতি?

Scanned by CamScanner

অস্মিনকালে নরনারীণাং মনাংসি নিতরাং প্রফুল্লিতানি ভবন্তি। শরৎকালঃ বঙ্গবাসিনামুৎসবকালঃ। বঙ্গবাসিনাং শ্রেষ্ঠোৎসবঃ দুর্গোৎসবঃ শরদি এব অনুষ্ঠীয়তে। মহিষমর্দিন্যাঃ দুর্গাদেব্যাঃ মহতী পূজা অধুনা ন কেবলং বঙ্গেষু ভারতবর্ষে সর্বত্র এব সাড়ম্বরম্ অনুষ্ঠীয়তে। দুর্গাপূজা প্রভৃতি বিবিধাঃ পূজাঃ প্রচলিতাঃ সত্যঃ ক্রমেণ বঙ্গেষু উৎসবা ভবন্তি। তেষু শারদোৎসবঃ মহত্তমঃ শ্রেষ্ঠশ্চ।

শরদঃ প্রাতঃ আগমনী গীতস্য মাধুর্যং বিজয়াগীতস্যকারুণ্যঞ্চ সর্বে সদা স্মারং স্মারং অব্যক্তমানন্দমনুভবন্তি। শরদি পূজাবকাশ ইতি নাম্না বিদ্যালয়েষু মহাবিদ্যালয়েষু বিচারালয়েষু চ সর্বত্র অবকাশো বিদ্যতে।

সংস্কৃত সাহিত্যে এবং কাব্যং ন বিদ্যতে যত্র শরদ্বর্ণনা নাস্তি। অতঃ জনমনোমোহিনী শারদমাধুরী কেনাপি কদাপি নোপেক্ষণীয়া অপি চ শরৎ সর্বৈঃ সদা বন্দনীয়া বরণীয়া চ।

## ১৪. বসন্তঃ

সৌভাগ্যমেতদস্মাকং দেশে ষড়ঋতবঃ স্বসময়ানুসারং সমায়ান্তি গচ্ছন্তি চ। প্রত্যেকর্তুর্মাসদ্বয়ং তিষ্ঠতি। যদ্যপি সর্বেষামৃতূনাং পৃথক্ পৃথক্ মহত্ত্বং বর্ততে তথাপি বসন্তস্য গৌরবং সমধিকম্। অয়মৃতুঃ বঙ্গেষু ফাল্গুন চৈত্রমাসয়োর্ভবতি। শিশিরান্তরং গ্রীষ্মস্য চ প্রাক্ অস্য কালঃ। তেন অস্মিন্ঋতৌ নাধিকং শীতং ন চাধিকোষ্ণতা বর্ততে। অতোঽয়ং সময়োঽতিমনোহরঃ স্ফুর্তিপ্রদশ্চ।

অস্মিন্ঋতৌ প্রাতঃ সায়ং চ উভৌ কালৌ ন কেবলং মনোহরৌ অপি অত্র ভ্রমণং স্বাস্থ্যকরম্। বসন্তকালঃ বৈচিত্র্যস্য কালঃ। যত্র যত্র তদা দৃষ্টিঃ পততি তত্রৈব পুষ্পশোভা নেত্রানন্দং জনয়তি। ক্ষেত্রেষু সর্ষপাণি কুসুমানি উদ্যানেষু বাটিকাসু চ বিভিন্নবর্ণানি বিবিধানি কুসুমানি বিকসন্তি। কোকিলানাং বিহগানাং কূজনম্, পাদপেষু কম্পমানানি নবকিশলয়ানি, বিমলজলানি নদীসরাংসি মন্দংমন্দং বাতপ্রবহনঞ্চ কস্য মনো নাহ্লাদয়ন্তি। পুষ্পরসমাসাদ্য হৃষ্টা ভ্রমরাঃ সর্বেষামেব সহৃদয়ানাং মনাংসি সরসানি জায়ন্তে। এতৈরেব হেতুভিঃ বসন্তো ঋতুরাজ ইত্যভিধানং লভতে।

বৈজ্ঞানিক দৃষ্টিকোণেনাপি অয়ম্ ঋতুরতিমহত্ত্বপূর্ণোঽস্তি। বসন্তে শরীরে নিপতিতেন রবিকিরণেন শরীরান্তঃপোষকতত্ত্বানামুৎপত্তির্ভবতি। রক্তশুদ্ধিরপি ভবতি। যথা বসন্তে প্রকৃতিঃ প্রাকৃতিক সমৃদ্ধ্যা বিভূষিতা ভবতি, তথা মানবোঽপি সর্বাঙ্গশুদ্ধঃ স্বস্থশ্চাস্মিন্ সময়ে ভবতি। কিং বহুনা সর্বেঽপি নবীনা স্ত্রীপুরুষাঃ স্ফূর্তিমাদদানাঃ সোৎসাহা উন্মদা ইব ইতস্ততো ভ্রমন্তি।

Scanned by CamScanner

# ১৭. সংস্কৃতদিবসঃ

সূর্যস্য উদয়মস্তঞ্চ অবলম্ব্য প্রতিবর্ষং পঞ্চষষ্ট্যুত্তর ত্রিশতদিবসা ভবন্তি। তেষু একো দিবসঃ সংস্কৃত দিবস ইতি খ্যাতিমলভত। এবং চিহ্নিতকরণস্য কারণং স্পষ্টম্। যতঃ জনকল্যাণার্থং যানি যানি কর্মাণি সন্তি তত্তদ্‌বিষয়িনী চিন্তা অস্মাকং মনসি জায়তে তথাপি গ্রাসাচ্ছানাদ্যাহরণ চিন্তয়া উদ্বিগ্নাঃ বয়ং সদা তত্তৎ কর্ম কর্ত্তুং ন শক্নুমঃ। তেন অস্মাভির্নিয়মং কৃত্বা প্রতিবর্ষং কেচিদ্দিবসাশ্চিহ্নিতা ক্রিয়ন্তে, যেষু সর্বৈর্মিলিত্বা তত্তদ্‌বিষয়কানাং নির্ধারিতানাং কার্যানুশীলনং কর্ত্তুং শক্যতে। তে চ যথা — স্বাধিনতাদিবসঃ, শিক্ষকদিবসঃ, সাক্ষরতাদিবসঃ, নারীদিবসঃ ইত্যেবমাদয়ঃ। অপিচ মহাপুরুষাণাং জীবনাদর্শমনুসর্ত্তুং তেষা-মাবির্ভাব তিরোভাব দিবসেষু তত্তদ্‌দিবসোচিতা বিষয়াঃ দেশবাসিভিঃ সশ্রদ্ধং সমালোচ্যন্তে বিবিধৈরনুষ্ঠানৈঃ পাল্যন্তে চ। যথা রবীন্দ্রজয়ন্তী, মহাবীরজয়ন্তী, নেতাজী জয়ন্তী ইত্যাদয়ঃ দিবসাঃ।

এবমেব একোদিবসঃ সংস্কৃতদিবস ইতি চিহ্নিতোঽস্মাভির্ভারতীয়ৈঃ র্মহতাদরেণ পাল্যতে। এতত্তু যথার্থং যৎ, সংস্কৃতমেব প্রাচীনভারতভারতী। অনয়া ভাষয়া এব বিরচিতানি বেদোপনিষৎ পুরাণ মহাকাব্যানি ভারতসংহতিং ধারয়ন্তি সমুজ্জ্বলাঞ্চ কুর্বন্তি। অপিচ আধুনিক ভাষাণাং প্রসূতিস্বরূপা। সাম্প্রতিক কালেতু কতীনাং স্বল্পজ্ঞানাং দুর্বুদ্ধিবশাৎ সংস্কৃতস্য উপযোগিতাং বিকৃত্য বিদ্যালয়তঃ প্রায়ঃ সংস্কৃত ভাষা উচ্ছিন্না। অতঃ সম্যগনুশীলনাভাবাৎ সংস্কৃত - ভাষায়াঃ ক্রমশঃ বিলুপ্তির্জায়তে। তস্মাৎ ভারত সংস্কৃতিরপি বিপন্না জাতা, অতঃ

Scanned by CamScanner

পুনস্তস্য সংস্কৃতস্য যথা সম্যক্ প্রচারঃ পরিশীলনঞ্চ তথা কার্যক্রমনির্ধারণার্থং ভারতসর্বকারেণ দিবস একো নির্ধারিতঃ। খ্রীষ্টীয় ১৯৬৯ তমাব্দে অস্য দিবসস্য শুভ প্রতিষ্ঠা জাতা। তদানীমারভ্য প্রতিবর্ষং শ্রাবণী পূর্ণিমাতিথৌ সংস্কৃত দিবসঃ সর্বৈঃ ভারতবাসিভিঃ সাদরং পাল্যতে।

শ্রাবণী পূর্ণিমা তিথৌ পৌরাণিক কালতঃ রক্ষাবন্ধন দিবসঃ ইতি ভারতর্ষিভিঃ নির্দিষ্টীকৃতঃ। অতঃ অধুনা বিপন্নায়াঃ সংস্কৃতভাষায়াঃ রক্ষণার্থং তদ্দিনং সংস্কৃত-দিবস ইতি নির্দিষ্টীকরণং তাৎপর্যমণ্ডিতম্। সংস্কৃত দিবস পালনং ভারতবর্ষস্য সর্বত্র বিশেষতঃ বিদ্যায়তনেষু পাঠাগারেষু সারস্বতসমাজেষু যদ্যপি কার্যক্রমানুসারেণ সমুচিতম্ তথাপি তন্ন দৃশ্যতে। কেবলং কেষু চতুষ্পাঠীষু সংস্কৃত বিদ্যালয়েষু এবং অনুষ্ঠীয়তে। এতদস্মাকং দুর্ভাগ্যম্। ভারতস্য সংস্কৃতে স্তথা সংহতেঃ সুরক্ষার্থং সংস্কৃতভাষায়াঃ পুনরুজ্জীবনমপরিহার্যম্। প্রতিদিবসমধুনা ভারতীয়াঃ সংস্কৃতদিবস ইতি মন্যমানা যদি যতন্তে তর্হি ভারতীয়ানাং ভারতীয়ত্বং রক্ষিতং ভবেৎ।

অতঃ সংস্কৃতদিবসপালনং সর্বৈঃ ভারতীয়ৈঃ প্রতিবর্ষং কার্যক্রমানুসারেণ সাদরং সশ্রদ্ধঞ্চ করণীয়মিতি।

## ১৮. ভারতীয় সংস্কৃতৌ সংস্কৃতম্

ইহখলু যথা বহবো দেশা বিদ্যন্তে তথৈব দেশভেদেন বহুবিধা জাতয়ঃ সন্তি। জাতিভেদমাশ্রিত্য বহুবিধাঃ সংস্কৃতয়োঽপি সঞ্জাতাঃ। জাতীনাং চিন্তা, দর্শনং, জীবনচর্যা চ মিলিতাঃ সন্তঃ সংস্কৃতিঃ সম্পদ্যতে। অতো দেশবৈষম্যাৎ জাতিবৈ-ষম্যাচ্চ সংস্কৃতিবৈষম্যং দৃশ্যতে। ভারতসংস্কৃতেঃ চীনসংস্কৃতেঃ, জাপানসংস্কৃতেশ্চ পার্থক্যং সুস্পষ্টম্। সংস্কৃতীনাং ভেদস্য মুখ্যকারণং শাস্ত্রভেদঃ সাহিত্যভেদশ্চ। শাস্ত্রং লোকান্ শাস্তি কার্যাকার্যং নির্দিশতি। সাহিত্যং আখ্যায়িকয়া মনোহরেণা-লাপেন কর্তব্যাকর্তব্যমুপদিশতি। শাস্ত্রং সাহিত্যং ইতিহাস এবং সংস্কৃতের্মূলম্ আস্পদংবা। তেন একস্মিন্নেব দেশে সম্প্রদায়ানুসারেণ বিভিন্নাঃ সংস্কৃতয়ঃ পরিলক্ষ্যন্তে। অতো দেশবাসিনঃ কস্যচিৎ সম্প্রদায়স্যানুগমিনশ্চেৎ স্বকীয়ানাং শাস্ত্রানাং সুদীর্ঘ-কালং নিরন্তর মনুশীলনং কুর্বন্তি তেন তেষাং মনসি শাস্ত্রানুসারী সংস্করো জায়তে।

ভারতস্য সংস্কৃতেরাধারো মুখ্যতঃ বেদোপনিষৎপুরাণ রামায়ণ মহাভারতাদয়ঃ। যতঃ প্রাগৈতিহাসিক যুগাদেব ভারতবাসিনঃ বেদোপনিষৎ-পুরাণ-রামায়ণ-ভারতাদীনামনুশীলনং কুর্বন্তি। তেন বেদাদি শাস্ত্রান্যনুসৃত্য রামায়ণাদিশাস্ত্রেতিহাসানবলম্ব্য গার্হস্থ্যধর্মং পরিপালয়ন্তি সামাজিকাচরণানি চ আচরন্তি। এতানি সর্বাণি আচরণান্যেব ভারতসংস্কৃতিভূতানি। যথা মাতাপিত্রোঃ

Scanned by CamScanner

পূজনং, গুরুসেবা, দেবতার্চনং, গৃহস্থানামতিথি সেবা, নারীনাংপাতিব্রত্যম্, বিনয়ানুশীলনং — সর্বাণ্যেব আচরণানি ভারতসংস্কৃতেরঙ্গভূতানি।

এতস্যাঃ সংস্কৃতেরুৎসক্ষেত্রাণি বেদাদি উপনিষদাদি দর্শনানি, পুরাণাদীনি, রামায়ণ-মহাভারতাদীনি সাহিত্যানি সর্বাণ্যেব সংস্কৃতভাষয়া নিবদ্ধানি। অতঃ সংস্কৃতভাষাজ্ঞানং বিনা ভারতসংস্কৃতেঃ স্বরূপং নাবগন্তব্যম্। ভারতসংস্কৃতেঃ সম্বন্ধঃ সংস্কৃতেন সহ প্রতিপাদ্য-প্রতিপাদকরূপেণ বিদ্যতে। অতঃ ভারত-সংস্কৃতৌ সংস্কৃতস্য স্থাননির্ণয়ং উপযোগিতাপ্রদর্শনংচ অনির্বচনীয়মেব। সংস্কৃতং বিনা ভারতসংস্কৃতে রস্তিত্বমপি অচিন্তনীয়মিতি।

## ১৯. ঈশ্বরচন্দ্র বিদ্যাসাগরঃ

বঙ্গেষু বহবঃ পণ্ডিতা জাতাঃ; বিদ্যাসাগরস্য তুল্যস্তু জনো ন ভূতো ন ভবিষ্যতি বা। তস্য নাম বঙ্গেষু আবালবৃদ্ধবণিতাঃ সর্বে জানন্তি। যদা অস্মাকং ভারতবর্ষ্ম, অশিক্ষয়া, কুশিক্ষয়া, কুসংস্কারেণ চ তিমিরাচ্ছন্নমাসীৎ তদৈবোন-বিংশশতাব্দ্যাং ভগীরথ ইব শিক্ষাগঙ্গায়াঃ স্রোতোধারয়া বিশেষতঃ বঙ্গপ্রদেশং প্লাবয়িতুম্ ঈশ্বরস্বরূপ ঈশ্বরচন্দ্র আবির্বভূব।

১৮২০ খ্রীষ্টাব্দে সেপ্টেম্বর মাসস্য ষড়বিংশ দিবসে ইদানীন্তন মেদনীপুরা-ন্তর্গতবীরসিংহনামকে গ্রামে বন্দ্যোপাধ্যায়বংশে ঈশ্বরচন্দ্রোঽজায়ত। তস্য পিতুর্নাম ঠাকুরদাস বন্দ্যোপাধ্যায়ঃ মাতা চ ভগবতী দেবী। ঈশ্বরচন্দ্রস্য পিতা অতীব দরিদ্র আসীৎ। তেন স বাল্যে মহতা কষ্টেন বিদ্যাভ্যাসমকরোৎ। অতিশৈশবে স কালীকান্ত চট্টোপাধ্যায় মহোদয়স্য গ্রাম্য পাঠশালায়াং পাঠং সমাপ্য নবমবর্ষবয়সি পিত্রা সহ পদব্রজেন কলিকাতামাগত্য সংস্কৃত মহাবিদ্যালয়ে শিক্ষারম্ভঞ্চকার। অত্র দ্বাদশবর্ষৈঃ কাব্যাব্যাকরণ দর্শনাদি বিষয়েষু শিক্ষাংসমাপ্য তত্রতঃ এব 'বিদ্যাসাগর' ইতি উপাধিমলভত।

বঙ্গেষু শিক্ষাসংস্কারে প্রসারে চ বিদ্যাসাগরঃ অগ্রগণ্যঃ। স কর্মজীবনে বিদ্যালয়-পরিদর্শকপদং গৃহীত্বা প্রথমমেব শিক্ষাবিস্তারার্থং বহুষু গ্রামেষু নগরেষু চ বিদ্যালয়-মহাবিদ্যালয়স্থাপনঞ্চকার। তস্য কর্মজীবনং বিচিত্রম্। স আদৌ ফোর্ট উইলিয়ম্ কলেজস্য বঙ্গ ভাষাবিভাগীয় প্রধান পণ্ডিতপদং, ততশ্চ সংস্কৃত মহাবিদ্যালয়স্য সহকারি সম্পাদক পদং পরিগৃহীতবান্। একদা সংস্কৃত মহাবিদ্যালয়স্য কার্যভারং পরিত্যজ্য অপি পুনঃ তত্রাগত্য অধ্যক্ষপদমলঙ্কৃতবান্। তদা মহাবিদ্যালয়স্য তথা বঙ্গীয়শিক্ষাক্ষেত্রস্য প্রভূতঃ সংস্কারস্তেন সাধিতঃ।

Scanned by CamScanner

সংস্কৃত ভাষায়াঃ প্রসারার্থং স ব্যাকরণোপক্রমণিকা ব্যাকরণকৌমুদী চেতি সংক্ষিপ্ত ব্যাকরণশাস্ত্রগ্রন্থদ্বয়ং কালিদাসাদীনাং গ্রন্থাংশ্চ সম্পাদিতবান্। পুস্তকপ্রকাশনার্থং স্বকীয়ং মুদ্রণযন্ত্রমপি স্থাপিতবান্।

বঙ্গভাষাপ্রসারেঽপি তস্যাবদানমুল্লেখ্যম্। তেন শিশুশিক্ষার্থং বর্ণপরিচয়-আখ্যানমঞ্জরীবোধোদয়-কথামালা প্রভৃতীনি পুস্তকানি-রচিতানি। সর্বসাধারণার্থং চরিতকথা-শকুন্তলা-সীতায়াঃ বনবাস ইতাদয়ো বহবঃ অনুবাদগ্রন্থাঃ তেন বিরচিতাঃ। স্ত্রীশিক্ষায়াঃ প্রবর্তনেঽপি তস্য অবদানমস্তি। বিধবাবিবাহ প্রবর্তনং তস্য সমাজসংস্কারস্য শ্রেষ্ঠং নির্দশনম্। এতৎ সংস্কারার্থং স মহাভাগঃ পরাশর-সংহিতামালোচ্য সুমহৎক্লেশং স্বীকৃতবান্।

ঈশ্বরচন্দ্রো ন কেবলং বিদ্যাসাগরঃ। স স্বকীয়েন দয়ালুতয়া 'দয়াসাগর' ইতি খ্যাতিমগাৎ। তস্য গুণবত্তাং বিদ্যাবত্তাং হৃদয়বত্তাং চ কথয়া কেনাপি একত্র বর্ণয়িতুংন শক্যতে। অয়ং মহাপুরুষঃ ১৮৯১ খ্রীষ্টবর্ষে জুলাইমাসস্য ঊনবিংশ দিবসে লোকান্তরমগচ্ছৎ। লোকান্তরগমনাৎ শতাধিকবর্ষে গতেঽপি তস্য স্মৃতিরবদানং প্রভাবশ্চ বঙ্গীয়ানাং হৃদয়েষু চিরায় বিরাজন্তে।

## ২০. স্বামী বিবেকানন্দঃ

পুণ্যভূমে ভারতবর্ষস্য বিবেকবাণী বিশ্বদরবারে য সোচ্চৈঃ সমুদ্‌ঘোষিতবান্ স যতিরাজঃ কর্মযোগী স্বামী বিবেকানন্দঃ।

১৮৬৩ খ্রীষ্টবর্ষে জানুয়ারী মাসস্য দ্বাদশদিবসে কলকাতায়া সিমুলিয়া পল্ল্যাম্ প্রখ্যাতদত্তকুলে স আবির্বভূব। তস্য পিতুর্নাম বিশ্বনাথ দত্তো মাতুশ্চনাম ভুবনেশ্বরী দেবী। তস্য পিতৃদত্ত নাম নরেন্দ্রনাথ দত্ত ইতি। নরেন্দ্রনাথ শৈশবাদেব যথা মেধাবী তথা সাহসী, সংস্কারমুক্তশ্চাসীৎ। তস্য নির্ভীকতাবিষয়কানি বহূনি আখ্যানানি সন্তি। সঙ্গীতেঽপি তস্য নৈপুণ্যমাসীৎ। তস্য শিশুমনসি এবং ঈশ্বরচিন্তা সঞ্জাতা। তেন ধ্যানং তস্য ক্রীড়ায়া অঙ্গমেকমাসীৎ। মহাবিদ্যালয়ে স্নাতকশ্রেণ্যামধ্যয়নকালে এব পাশ্চত্যদর্শন-প্রভাবাৎ ঈশ্বরস্যাস্তিত্ব-বিষয়ে তস্য মনসি সংশয়ো জায়তেস্ম। অস্মিন্নেব কালে তস্য পিতৃবিয়োগোঽভবৎ। ততঃ যদ্যপি স স্নাতকপরীক্ষায়ামুত্তীর্ণ আসীৎ তথাপি তস্য অর্থাভাবাৎ পুনরধিকতরমধ্যয়নং নাভূৎ।

অথৈকদা স সহসা দক্ষিণেশ্বরে অবতারবরিষ্ঠস্য শ্রীরামকৃষ্ণদেবস্য দর্শনমলভত। তস্য দর্শনেনোপদেশেন চ নরেন্দ্রনাথস্য ঈশ্বরবিষয়ে সংশয়ো

Scanned by CamScanner

দুরীভূতোঽভবৎ। অপি চ নরেন্দ্রনাথঃ ভগবন্তং শ্রীরামকৃষ্ণং প্রতি আকর্ষণ বশাৎ তস্য শিষ্যত্বং গৃহীতবান্। ততঃ প্রভৃতি তস্য নাম স্বামী বিবেকানন্দ ইতি অভবৎ। তস্য কণ্ঠমাধুর্যেন বাগ্‌বৈদগ্ধ্যেন চ বিশ্বেজনাঃ মুগ্ধা আসন্।

ততঃ স্বামী বিবেকানন্দঃ পরিব্রাজক রূপেণ সমগ্রং ভারতবর্ষং পরিভ্রমন্ দেশবাসিনাং দুর্দশাং দৃষ্ট্বা পীড্যমানো জীবসেবাধর্মং প্রচারিতবান্।

১৮৯৩ খ্রীষ্টবর্ষে স্বামীজী আমেরিকাস্থ চিকাগো নগরে অনুষ্ঠিতে বিশ্বধর্মসম্মেলনে হিন্দুধর্মস্য মহিমানং ঘোষয়িত্বা হিন্দুধর্মস্য প্রাধান্যং স্থাপিতবান্। স চ পাশ্চাত্ত্যদেশেষু বেদান্তধর্মস্য অদ্বৈতবাদমপি প্রচারিতবান্। তদা পাশ্চাত্ত্য দেশীয়া স্ত্রীপুরুষা তস্য শিষ্যত্বং গৃহীতবন্তঃ। যেষামন্যতমা ভগিনীনিবেদিতা ভারতবর্ষমাগত্য বিবেকানন্দদর্শনমনুসৃত্য ভারতনিবেদিতাপ্রাণা সঞ্জাতা।

১৮৯৭ খ্রীষ্টাব্দে বিবেকানন্দ বেলুড় ইত্যাখ্যে জনপদে 'রামকৃষ্ণমিশনং' প্রতিষ্ঠাপয়ামাস। জনসেবার্থং ভারতাভ্যুদয়ার্থঞ্চ নিরন্তরেণ শ্রমেণ ভগ্নস্বাস্থ্যঃ সন্ কর্মযোগী বীরেশ্বরো বিবেকানন্দ ঊনচত্বারিংশদ্বর্ষবয়সি এব ১৯০২ খ্রীষ্টবর্ষে জুলাই মাসস্য চতুর্থ দিবসে স্বর্লোকং গতবান্। অদ্যাপি তস্য ভাবাদর্শঃ সেবাধর্মঃ শ্রীরামকৃষ্ণমঠ-মিশনে বিরাজতে। তস্য বাণী রচনা ভারতীয়ানাং পথদর্শিকা। বয়ং তং সদৈব মন্ত্রেণানেন নমামঃ —

'যো ধর্মস্থাপনরতো বীরেশং তং নমাম্যহম্।

## ২১. রবীন্দ্রনাথঃ

বঙ্গভূমি র্ন কেবলং সুজলা সুফলা শস্যশ্যামলা, অপি চ সা রত্নপ্রসূতা। বঙ্গেষু কতি সাধকাঃ সাহিত্যিকাঃ কবয়ঃ জয়ন্তে ইয়ত্তা নাস্তি। কিন্তু একাধারে সাধকঃ সাহিত্যিকঃ কবিঃ নাট্যকার শ্চিত্রকরশ্চ — এবং জনঃ প্রায়শঃ কুত্রাপি ন দৃশ্যতে। রত্নগর্ভায়াঃ বঙ্গজনন্যাস্তু এবং রত্নস্বরূপঃ সুতোঽজায়ত যস্য নাম কবীন্দ্রো রবীন্দ্রনাথঃ।

কলকাতা নগর্য্যাং জোড়াসাঁকো পল্ল্যাং প্রসিদ্ধে ঠাকুর পরিবারে বিশ্ববিশ্রুতঃ কবিঃ রবীন্দ্রনাথঃ ১২৬৮ বঙ্গাব্দে সৌর বৈশাখ মাসস্য পঞ্চবিংশতি দিবসে আবির্ভূত আসীৎ। তস্য পিতা মহর্ষিঃ দেবেন্দ্রনাথ ঠাকুরঃ মাতা চ সারদা দেবী। তদানীং ঠাকুর পরিবারো বিদ্যয়া জ্ঞানবিজ্ঞানশিল্প চর্চয়া বিভবেন চ সমুন্নত আসীৎ।

Scanned by CamScanner

রবীন্দ্রনাথঃ শৈশবাদেব বিদ্যালয়স্য প্রথাবদ্ধ শিক্ষায়াংশ্রদ্ধাশীলো নাসীৎ। তেন কিঞ্চিৎকালমেব স বিদ্যালয়গতং পাঠং গৃহীত্বা স্বগৃহে বিবিধবিদ্যানাং প্রভূতমনুশীলনং কৃতবান্। অতি শিশুকালাদেব তস্য কবিত্বশক্তে রুন্মেযোঽভবৎ।

রবীন্দ্রনাথঃ প্রণীতং কবিতানাং প্রথমং পুস্তকং সন্ধ্যা ইতি। ততস্তেন বিরচিতানি প্রভাতসঙ্গীত, কড়ি ও কোমল, মানসী, সোনারতরী, চিত্রা, চৈতালী প্রভৃতীনি কাব্যানি প্রকাশিতানি। তস্য কবি প্রতিভায়াঃ বৈশিষ্ট্যং যৎ, এবম্ কিমপি জাগতিকং নাস্তি, যদাশ্রিত্য তস্য রচনা নাস্তি। ন কেবলং কাব্যং কবিতা চ। স ডাকঘর, বিসর্জন, রক্তকরবী, চিত্রাঙ্গদা প্রভৃতীনি নাটকানি; গোরা, নৌকাডুবি — প্রভৃতীনি উপন্যাসানি বহূনি আখ্যানানি চ বিরচিতবান্। প্রবন্ধ রচানায়ামপি তস্য নৈপুণ্যং দর্শনীয়ম্। মুখ্যতঃ রবীন্দ্রনাথ আসীৎ সাহিত্য সাম্রাজ্যস্য অধীশ্বর ইব। গদ্যং পদ্যং গীতং নাট্যং প্রবন্ধং কাব্যম্ উপন্যাসং কথাসাহিত্যং সর্বাণ্যেব স রচিতবান্। সঙ্গীত জগতি রবীন্দ্রসঙ্গীতস্য বিশেষস্থানমস্তি।

কেবলং বঙ্গভাষয়া সাহিত্যং রচয়িত্বা স প্রতিভয়া বিশ্বসাহিত্যপ্রাসাদে শীর্ষস্থানমধিকৃতবান্। স গীতাঞ্জলি ইতি কাব্যস্যোৎকর্ষেন বিশ্ববন্দিতং নোবেল-পুরস্কারং প্রাপ্তবান্। বৈদেশিকেন শাসকেন চ নাইট ইতি উপাধিনাপি ভূষিতঃ, কিন্তু দেশপ্রেমিকঃ কবিঃ ভারতীয়ান্ প্রতি ইংরেজ শাসকস্য অত্যাচারস্য প্রতিবাদরূপেন তমুপাধিং প্রত্যাখ্যাতবান্।

রবীন্দ্রনাথঃ তপোভূমেঃ ভারতভূমেঃ শিক্ষাদর্শেন শিক্ষাদানার্থং বীরভূমমণ্ডলান্তর্গতে বোলপুর নামকে জনপদে বিশ্বভারতী ইতি বিশ্ববিদ্যালয়ং স্থাপিতবান্। তত্র অধুনাপি ভারতীয়া বিদেশীয়াশ্চাপি জ্ঞানার্জনায় আগচ্ছন্তি।

অস্মাকং দুর্ভাগ্যবশাৎ ১৩৪৮ বঙ্গাব্দে শ্রাবণস্য দ্বাবিংশ দিবসে ভারতরবিঃ বিশ্বকবিঃ রবীন্দ্রনাথঃ মহাপ্রয়াণং কৃতবান্। রবীন্দ্রনাথস্য নশ্বরং শরীরং বিনষ্টং, কবীন্দ্র রবীন্দ্রস্তু অস্মাকং কথায়াং চিন্তায়াং সাহিত্যে গীতে চ জীবত্যেব।

## ২২. নেতাজী সুভাষচন্দ্রঃ

ভারতবর্ষস্য স্বাধীনতেতিহাসে যেষাং ভারতরত্নানাং নামানি বিদ্যন্তে তেষাং সর্বপ্রথমং স্বর্ণাক্ষরৈ র্যন্নাম লিখিতমস্তি তৎ নেতাজী সুভাষচন্দ্র ইতি। । নেতাজী সুভাষচন্দ্র বসুঃ বঙ্গবাসিনাং গৌরবঃ ভারতস্য উজ্জ্বলজ্যোতিষ্কঃ।

মানবশ্রেষ্ঠোঽয়ং ১৮৯৭ খ্রীষ্টাব্দে জানুয়ারী মাসস্য ত্রয়োবিংশ দিবসে উৎকল প্রদেশান্তর্গত কটকনগরে জায়তেস্ম। তস্য পিতা জানকীনাথ বসু রাসীদেকো ব্যবহারজীবী। মাতা চ প্রভাবতী দেবী।

Scanned by CamScanner

প্রাথমিকীং শিক্ষাং সমাপ্য সুভাষচন্দ্রঃ কলিকাতাম্ আগম্য বিদ্যালয়-শিক্ষাসমাপনানন্তরং বৈরাগ্যাৎ গৃহং ত্যক্ত্বা কতি মাসান্ তীর্থপর্যটনং কৃতবান্। ততঃ পুনঃ প্রত্যাবর্ত্য পাঠে মনোনিবেশং কৃত্বা আই. এ. পরিক্ষোত্তীর্ণঃ প্রেসিডেন্সী মহাবিদ্যালয়ে দর্শনশাস্ত্রম্ অধিকৃত্য অধ্যয়নম্ আরেভে। তত্র তু ওটেন ইতি নাম কশ্চিৎ অধ্যাপকঃ ভারতীয়ান্ প্রতি কটুব্যাক্যোচ্চারণাৎ সুভাষেণ প্রহৃতঃ। তস্মাৎ সুভাষঃ অস্মাৎ মহাবিদ্যালয়াৎ বহিষ্কৃতঃ। ততঃ আশুতোষ মুখোপাধ্যায়স্য অনুগ্রহেণ সুভাষঃ স্কটিশচার্চ মহাবিদ্যালয়াৎ দর্শনশাস্ত্রে স্নাতকোঽভবৎ। পুনঃ স লণ্ডনং গত্বা আই. সি এস. পরীক্ষায়াং কৃতিত্বেন সাফল্যমলভত। তদনন্তরং স স্বদেশং প্রত্যাগত্য রাজকীয়বৃত্তিং ঘৃণয়া পরিহৃত্য জন্মভূমেঃ শৃঙ্খলামোচনার্থম্ আত্মোৎসর্গং কৃতবান্।

দেশবন্ধু চিত্তরঞ্জন দাসস্য ভাবশিষ্যত্বং গৃহীত্বা তস্য সহযোদ্ধৃরূপেণ সুভাষঃ, মুক্তিসংগ্রামজীবনং প্রারব্ধবান্। ১৯৩৭ খ্রীষ্টাব্দে স কলকাতা কর্পোরেশনস্য মেয়রপদে নির্বাচিতোঽভূৎ। ১৯৩৮ খ্রীষ্টাব্দে হরিপুরা কংগ্রসাধিবেশনে ভারতীয় জাতীয় কংগ্রেসস্য সভাপতি পদমলভত। ততঃ ব্রিটিশ শাসকবর্গেণ স কারারুদ্ধোঽভবৎ। কারাবাসে স্বাস্থ্যভঙ্গাৎ স স্বগৃহে অবরুদ্ধোঽভবৎ। বৈদেশিক-শাসকবর্গেণাবরুদ্ধোঽপি ১৯৪১ খ্রীষ্টাব্দে জানুয়ারী মাসস্য ষোড়শদিবসে গভীরায়াং রজন্যাং পর্যটকবেশেন গৃহান্নির্গত্য জন্মভূমিং পরিত্যজ্য আদৌ কাবুলং ততঃ ইটালীং তৎপশ্চাৎ জার্মানীদেশং গতবান্। ততঃ স জাপানদেশং গত্বা জাপানশাসকবর্গস্য সহায়তয়া দেশজনন্যাঃ মুক্তয়ে সিঙ্গাপুরে আজাদ্‌হিন্দ ফৌজ ইতি মুক্তিবাহিনীং নির্মিতবান্। তস্য নেতৃত্বেন আজাদ্ হিন্দ ফৌজ ব্রহ্মদেশে বৃটিশ সৈন্য বাহিনীং পরাজিত্য ভারতবর্ষস্য জাতীয় পতাকামুত্তোলয়ামাস। অতঃ ভারতস্য স্বাধীনতার্জনে সুভাষচন্দ্রস্য অবদানমতুলনীয়ম্।

ততঃ পুনর্দেশান্তরযাত্রাকালে অস্মাকং দুর্ভাগ্যবশাৎ অস্য মহাত্মনঃ কি জাতং অদ্যাপি কোঽপি ন যথার্থং জানাতি। ইদানীন্তনেঽপি তু মৃত্যুঞ্জয়ী বীরো নেতাজী সুভাষচন্দ্রঃ ভারতীয়ানাং হৃদয়মন্দিরে অমরঃ এব তিষ্ঠতি আগামিনি দিবসে চ স্থাস্যতি।

Scanned by CamScanner

অশোক কুমার বন্দোপাধ্যায় সম্পাদিত 'পাণিনীয় Helps to the study of sanskrit Grammar& Compositions' এই গ্রন্থ থেকে ছাত্র–ছাত্রীদের কিছু তথ্য দিতে পেরে আমি মাননীয় সম্পাদকের কাছে চির কৃতজ্ঞ।

Scanned by CamScanner